International Journal of Scientific Research in Science and Technology
Print ISSN: 2395-6011 | Online ISSN: 2395-602X (www.ijsrst.com)

# आधुनिकपरिप्रेक्ष्ये मूल्यशान्तिशिक्षयोः अध्यापकस्य भूमिका

**डॉ. आरती शर्मा**
**सहायकाचार्या, शिक्षाशास्त्रविभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नई दिल्ली।**



**Article Info**
Volume 7, Issue 5
Page Number: 372-376

**Publication Issue :**
September-October-2020

**Article History**
Accepted : 15 Sep 2020
Published : 30 Sep 2020

**शोधसारः**:- शिक्षाक्षेत्रे बालकस्योपरि सर्वाधिकप्रभावः अध्यापकस्यैव भवति। अध्यापकः विद्यालये छात्राणाङ्कृते आदर्शो भवति। ज्ञाताज्ञाते बालकाः अध्यापकस्यानुकरणं कर्तुमिच्छन्ति कुर्वन्त्यऽपि। अध्यापकेन आदर्शः प्रस्तुतीकरणेन बालकेषु मूल्यानाम् विकासः संजायते, किन्तु अध्यापकः अस्मिन् सन्दर्भे सर्वप्रथमं स्वीय मूल्यानां निर्धारणं कृत्वा सरलतया, जागरूकतया, मूल्यवर्धनाय प्रयतते। अध्यापकस्य उद्देश्यं लक्ष्यञ्च यथोक्तं तथैव करणीयं भवेत्। अस्मिन् भौतिकसंसारे मानवाः सहस्राणि वर्षाणि व्यतीतवन्तः। क्रमेऽस्मिन् मानवाः केवलं स्वविकासस्यैव यात्रां नियोजितवन्तः। स्वेच्छानुसारमेवास्य प्रपञ्चस्य विकासङ्कृतवन्तः। तेन विज्ञानस्य प्रविधेश्च क्षेत्रेऽद्भुतं विकासं कृतवन्तः। परञ्च शान्तिप्राप्तये तस्य संघर्ष अधुनापर्यन्तमप्यनवरतरूपेण व्यक्तिगतस्तरे, राष्ट्रीयस्तरे, विश्वस्तरे च प्रचलत्येव। सम्प्रति मानवाः सर्वत्र खिन्नासन्तुष्टाः तनावयुक्ताश्च दृश्यन्ते। यदि वयमितिहासं पश्यामश्चेत् समाजे मध्ये-मध्ये श्रीकृष्ण-बुद्ध-महावीर-विवेकानन्द-दयानन्दादयो महानात्मन अपि जन्म अलभन्। महात्मागान्धी-लिंकन-मार्टिन-लूथर-किंगामहोदयासदृशाः नेतारोऽपि समाजेऽभूवन्। परञ्च मानवाः शान्तये यत्र-तत्राधुनापि भ्रमन्त्येव। यद्यपि महापुरुषाणामुपदेशात् किञ्चित् प्रभावोऽपि समाजे दृष्टरासीत् परञ्च पुनः सैव स्थितिरुत्पन्ना जाता। एतादृशीं स्थितिं निवारयितुं शान्तिशिक्षायाः महती आवश्यकता विद्यते। अतः पत्रेऽस्मिन् शान्तिमूल्यशिक्षयोः मध्ये अध्यापकस्य भूमिका विषये चिन्तयामः।
मुख्यशब्दः– अध्यापकः, बालकाः, आदर्शः, ह्रासः, गुणाः, **अर्थः।**

---

**प्रस्तावना**- अधुना समाजे मूल्यानां ह्रासः, समाजस्य, राष्ट्रस्य, देशस्य कृते गम्भीरविषयः अस्ति। यदि समाजे व्यक्तीनां सर्वाङ्गीणविकासः अपेक्ष्यते। समाजे प्रेम-सत्य-विश्वबन्धुत्वादयः गुणाः अपेक्ष्यन्ते तर्हि राष्ट्रस्य रक्षार्थं बालकानां कृते प्राथमिक स्तरतः एव जीवनमूल्यानां महत्त्वं प्रतिपादनमावश्यकम् तथा जीवने तस्य आत्मसात्करणमपि अनिवार्यम्। व्यक्तित्वनिर्माणे, राष्ट्रनिर्माणे, मूल्यसंवर्धने च शिक्षकस्य महती भूमिका भवति। शिक्षा विना जीवनस्य कल्पनाऽपि अरण्यरोदनमिव अस्ति यदा अध्यापकः प्रारम्भिकस्तरे एव छात्रेषु मूल्यानां विकासः करिष्यति तदा एव जीवने उच्चता श्रेष्ठता च वर्धति।

मूल्यशब्दस्य अर्थः- भारतीय शास्त्रेषु मानवीयगुणानां परिप्रकाशाय शीलशब्दार्थे प्रयुक्तोऽयं मूल्यशब्द आंग्लभाषायाः Value इति पदात् निष्पन्नः। Value इति शब्दः लेटिन् भाषायाः Valere इति शब्दात् समुत्पन्नोऽस्ति। यस्य च शब्दस्य अर्थस्तावत् योग्यता, उपयोगिता एवं महत्त्वम् इत्यवबोध्यते। व्यक्तेः वस्तुनः च मूल्यं तादृशः कश्चन गुणः येन तस्य उपयोगिता महत्त्वञ्च प्रकटितं भवति। परन्तु बहुभिः विचारकैः मूल्यशब्दस्यार्थः भिन्नरीत्या प्रतिपादिताः। मानवीय-इच्छां यत् पूरयति तदेव मूल्यमिति। मानवस्य चिन्तने याः च इच्छाः प्रस्फुटिताः भवन्ति ताः इच्छाः कथं सद्गुणाधारिताः भवेयुः तदर्थं मूल्यं कार्यं करोति। सद्गुणानां साधनाय मूल्यं साधनं भवति। अतः जगति शीलवतां मूल्यवतां वा न किञ्चिदसाध्यम्। तदुक्तम्-

शीलेन हि त्रयोलोका शक्या जेतुं न संशयः।
न हि किञ्चिदसाध्यं वै लोके शीलवतां भवेत्॥

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**मूल्यशिक्षायाः प्रकृतिः**- मूल्यशिक्षायाः प्रकृतिः मानवगुणानामुपरि आधारिता भवति। मानवे यदि समुचितगुणाः विकसिताः भवन्ति। तर्हि व्यक्तित्वस्य विकासः अवश्यं सम्पद्यते। तस्मात् व्यक्तेः व्यक्तित्वस्य विकासाय याः आचारसंहिताः, ये सद्गुणाः, समूहोपकारकाः, मानवमुपकुर्वन्ति ता एव मानवीयाधाराः मानवीयमूल्यत्वे स्वीक्रियन्ते। वस्तुतः मूल्यानां अवधारणां स्वष्टतया ज्ञातुं तस्य प्रकृतिः ज्ञातव्या एव। मूल्यशिक्षायाः प्रकृतिः त्रिधा विभज्यते।

1. **आत्मनिष्ठा**- आत्मनिष्ठपक्षस्यानुसारं-मूल्यम्-इच्छा, रूचिः, कार्यकरणक्षमता, संकल्पशक्तिः सन्तोषादिकारकाणामुपरि आधारितं भवति। परिणामतः एतानि कारकाणि मानव-जीवने मूल्यरूपेण विकसितानि भवन्ति।
2. **वस्तुनिष्ठता**- एतस्य पक्षस्य आधारेण मूल्यं स्वतन्त्रं भवति। व्यक्तौ निहितं न भूत्वा वस्तुनिष्ठरूपेण प्रतिभाति।
3. **सम्बन्धिनी**- एतस्य पक्षस्य विचारे मूल्यं एकतोभावना अपरतः तर्कमित्यवगम्यते नियामकानां संरचनात्मकानाञ्च नियमानां मेलनस्थलं मूल्यमित्यभिधीयते। अपि चेदं मूल्यं मानववातावरणयोः मध्ये सुसम्बन्धस्थापनाय माध्यमिति परिज्ञायते। मूलस्य उपर्युक्तप्रकृतयः अधोलिखितगुणानामाधारेण आधारिताः।

1. मूल्यस्य उपर्युक्तप्रकृतयः अधोलिखितगुणानामाधारेण आधारिताः।
2. मूल्यं मानवीयसंवेगानामाभिव्यञ्जकम्।
3. मूल्यं सदीच्छापूर्तेः माध्यमम्।
4. मूल्यं वस्तुनां गुणाः।
5. मूल्यं तत्त्वसम्बन्धीयम्।

**मूल्यशिक्षायां अध्यापकस्य भूमिका**- व्यवहारपरिवर्तनमेव शिक्षायाः प्रमुखलक्ष्यमितिधिया शिक्षापाठ्यक्रमे, शिक्षाप्रक्रियायां च तादृशव्यवहारपरिवर्तनसक्षमविषयाणां नियोजनं करणीयम्। वस्तुतः तादृशमूल्यभित्तिकपाठ्यक्रमाणां निर्धारणेन छात्राणां मानसिकविकासेन सह नैतिक-चारित्रिक-सामाजिकश्च विकासः सम्पादितो भवेत्। एतेषां विकासेन शिशुः समाजे अक्लेशेन सामाञ्जस्यं संस्थाप्य स्वसृजनात्मकशक्तिभिः समाजं प्रभावयेत्। उपयुक्तव्यवहारप्रदर्शनाय छात्राणामन्तःकरणं प्रति मूल्याधारिता शिक्षा प्रेषणीया। एतत्कार्यं केवलमध्यापक एव सम्पाद्य छात्रणामान्तरिक विकासे महत्त्वपूर्णभूमिकां स्वीकरोति। जिज्ञासूनां छात्राणां समस्यां दूरीकृत्य तान् सन्मार्गे परिचालयति अध्यापकाः। न केवलं कक्षायामन्तः, वहिरपि स्वप्रभावेण छात्रान् प्रभावयति सः।

वाटिकायाः रक्षकः यथा स्वसेवया प्रयासेन परिश्रमेण च क्षुद्रवृक्षान् विकसितान्, पुष्पितान्, प्रस्फुटितान् च करोति तद्वत् अध्यापकः प्रार्थितयशसः छात्रान् ज्ञानान्देन अमृतीकरोति, छात्राणां जीवनोन्नतिं च साधयति। अनुकरणशीलाः खलु बालाः। तस्मात्तु शिक्षकस्य विचारान् आदर्शान् चानुकुर्वन्ति। यदि अध्यापकेन कायेन मनसा वाचा मानवीयादर्शाः स्वीकृताः स्युः तर्हि तेन आचारविचारव्यवहारयुक्तेन अध्यापकेन छात्रः विशेषप्रभाविताः स्युः।

एतस्यामवस्थायां सर्वेऽध्यापकबान्धवाः स्वात्मविचारशक्तया आत्मनं परिशील्य सत्यहिंसासदाचारदिगुणैः विभूषिताः सन्तः छात्रन् प्रभावयेयुः, मानवीयमूल्यान् शिक्षयेयुः च। छात्रेभ्यः मूल्यशिक्षाप्रदानाय अध्यापकाः केषु विषयेषु प्रयत्नं कुर्युः इत्यतः मई मासे 1981 भारतसर्वकारेण शिक्षक-प्रशिक्षणकार्यक्रमे प्राच्यमूल्यनामावश्यकतामनुभूयः अधोलिखिताः विचाराः प्रस्ताविताः-

1. छात्राणां मनस्सु नूतनचिन्तनानि आकाङ्क्षाणि च जागरयितुं, तेषां व्यवहारं परिमार्जयितुं, वाचः नियन्त्रियितुं च विभिन्नकार्यक्रमाणांक्रियान्वयनं करणीयम्।
2. छात्रेषु समानता-स्वाधीनतादि भावनानां विकासाय विद्यालयेषु सरस्वतीपूजा, गणेशपूजा, जातीयपर्वादीनां पालनं विधेयम्।
3. सौन्दर्यात्मकनुभूतेः विकासायः विभिन्नसाहित्यिकविषयाणां पाठनं भवेत्।
4. विद्यालयेषूत्सवपालनावसरे भोजनव्यवस्था क्रियते चेत् एकत्र उपविश्य भोजनेन भ्रातृत्वभावना परिवर्द्धते।
5. आन्तरिकानुशासनस्य, मानवीयमूल्यानाञ्च परिवर्द्धनार्थं तत्तत्सम्बन्धीविषयाणां चयनम्।

6. छात्राणां चेतनमनसः विकासाय आध्यात्मिकज्ञानं प्रदानम्।
7. नूतनसृजनात्मकशक्तेः विकासाय वादविवाद-श्लोकरचनाश्च कर्तुं प्रेरणाप्रदानम्।
8. योगशिक्षाद्वारा छात्राणां ध्यानकेन्द्रिकरणम्।

परन्तु आदर्शाध्यापकानाम् आदर्शेण छात्रः प्रभाविताः सन्तः स्वलक्ष्यं निर्धारयन्ति, तस्य लक्ष्यस्य पूर्त्तये आत्मनं नियोजयन्ति च। अतः सम्प्रति वयं ज्ञातुं शक्नुमः यत् मूल्यानां का उपयोगितेति। अत एव जीवने सर्वेषु क्षेत्रेषु मूल्यानां महत्युपयोगिता दरीदृश्यते।

**शान्तिशिक्षा**- जगदिदम् आधिव्याधिपीडितम्, दुःखदावाग्निदग्धम्, अभावग्रस्तम्, चिन्तासहस्रनिचितम्, अविश्वास-पिशाच-क्षुब्धम्, नृशंसकर्म-संत्रस्तम्, अन्नाद्यभाव-विसीर्ण-चित्तम्, क्षुत्पिपासाशीविष-सन्दष्टं च संलक्ष्यते। देशे, विदेशे, सर्वस्मिंश्च भूमण्डले, क्रान्तेर्विद्रोहस्य नरसंहारस्य च कारुणिकं दृश्यं प्रेक्ष्यते। शान्तेर्नामापि न श्रुतिपथमुपायाति। सर्वोऽपि लोकस्त्रासादीनां संहाराय, भयानां विध्वंसाय, अविश्वासस्य चापगमाय जीवने सुखशान्तेर्मूलं किमपि तत्त्वं कामयते। परं तत् तत्त्वं शान्तिश्च कथमिव लभ्या विश्वशान्तिमतरेणष कृतेऽपि प्रयत्ने शान्तिः सौख्यं समृद्धिश्च दुरवापान्येव। यत्र शान्तेर्निवास्तत्रैव सुखं, वैभवं, शिक्षा, उन्नतिः, कला-विकासः, धर्मचर्चा, संस्कृतिसमुदयः, सभ्यतोत्कर्षः, जीविकोपलब्धिः, सौकर्यञ्च।

विश्वशान्तिः कथं सम्भवति? सर एडवर्ड बेंटवर्थ बैटीमहोदयेन कनाडादेशे कनाडाविश्वविद्यालये स्नातकस्तरीयकक्षाणां समक्षं 26 मई 1926 तमे वर्षेऽद्वितीयं सम्भाषणं प्रस्तुतम्। यस्मिन् महोदयेनोक्तं यत् अस्माभिः प्रायशः एतादृशेभ्य आध्यात्मिकमूल्येभ्यः उपरि ध्यानं न दीयते, यस्मात् मानवस्य सम्पूर्णव्यक्तित्वस्य मूल्याकनं भवेत्। अद्य यावत् सर्वेषां युद्धानां कारणं भौतिकतायाः लोलुपतैव दरीदृश्यते। यदि वयं विचारः कुर्मश्चेत् ब्रिटिशदेशेन सम्पूर्णसंसारस्य व्यवस्था भौतिकसभ्यता च प्रदत्ता। जर्मनी-फ्रांसाभ्यां कलासङ्गीतादिभिः शोभासौन्दर्यं वर्धितम्, विज्ञानसाहित्यैः तस्य कोषाः परिपूरिताः अपि च मानवानां संसारस्य वशीभूते सति अन्तःकरणस्य आत्मनः वा विकारः एव कारणं प्रतिभाति।

आदौ ज्ञातव्यं वर्तते यत् शान्तिशिक्षायाः तात्पर्यं वर्तते शान्तिशिक्षा तत् विज्ञानं वर्तते यत् मानवानां मौलिकावश्यकतानां तथा च सामञ्जस्य- यथार्थप्रकृतिस्वरूपस्याध्ययनं क्रियते। एषा शिक्षा मानवाधिकाराणां हननं न स्यात् तादृशेभ्यः आवश्यकविषयेभ्यः पूर्तये भवति। अनया शिक्षया ज्ञापनं भवति यत् व्यक्तयः स्वाधिकारमिव शान्तिशिक्षायाः रक्षा सुरक्षा वाऽस्माकं प्रमुखोद्देश्यं वर्ततेऽर्थात् शान्तिशिक्षा साऽस्ति याऽशोषित-अहिंसक-शान्तप्रिय-आध्यात्मिकचिन्तनशील-सकारात्मकसामञ्जस्यादीनां निर्माणं करोति।

**शान्तिशिक्षायाः अर्थः**- शान्तिप्रियशिक्षायाः विषये विविधविचारः-

(क) डॉ. मर्सी अब्राहमहोदयानुसारम्- शान्तिशिक्षा शान्तप्रियमानवानां कृते भवति येन विश्वे शान्तप्रियवातावरणस्य निर्माणो भवेत्।

(ख) के. एस. बासतराजानुसारम्- शान्तिशिक्षैका प्रक्रिया, एकः कार्यक्रमशअच वर्तते। येन व्यक्तिषु शान्तिशिक्षायाः मूल्यानां विकासस्य भावो निहितो विहितो तथा च सामुदायिकजीवनं न्यायप्रिय-शान्तप्रिय-व्यवस्थित-सामञ्जस्यपूर्णतादिभिः शोभते।

(ग) डॉ. सर्वपल्ली राधा कृष्णनमहोदयानुसारम्- शरीर-मस्तिष्क-भावनासु सामञ्जस्यमेव शान्तिशिक्षायाः उद्देश्यं येन व्यक्ति-समाज-समूह-राष्ट्र-विश्वादयः सुखमयजीवनयापनं कर्तुं शक्नुवन्ति।

शान्तिशिक्षा मानवमूल्यानामुन्नतिं कृत्वा तेषां मानवानां शान्तिस्थापनार्थं प्रेरयति। शान्तिशिक्षयाऽभिप्रायः अहिंसैव दृश्यते, शक्तीत्यस्याऽभिप्रायः तारतम्यतायाः अर्थोऽभप्रेतः। शान्तिशिक्षायाः उद्देश्यं बाधारहित्यत्त्वात् शान्तिपूर्वकभावः एव। शिक्षा एतादृशी प्रक्रिया वर्तते यया कोऽपि व्यक्तिरन्यव्यक्तेः व्यवहारस्य परिवर्तनं क्रियते।

अतः शान्तिशिक्षायाः उद्देश्यं व्यक्तीनां ज्ञान-योग्यता-चरित्र-सकारात्मकव्यवहाराणां विकासः। अध्यापकैर्शान्तिशिक्षामाध्यमेन ज्ञानं तु दीयते परञ्च वर्तमानसन्दर्भे विद्यालयेषु-महाविद्यालयेषु-विश्वविद्यालयेषु वाऽनिवार्यत्वेन न पाठ्यते। शान्तिशब्दस्यस्याङ्गलभाषायां (peace) इति शब्दः प्रयुच्यतेऽस्यपूर्णार्थः ज्ञापनाय विश्लेष्यते।

P= peaceful, E= environment, A= among, C= communities, E= everywhere

अर्थात् समस्तविश्वस्य समुदायेषु शान्तिपूर्णवातावरणस्य स्थापनैव शान्तिशिक्षायाः प्रमुखं कार्यम्।

**शान्तिशिक्षायाः प्रकाराः-**

(क) आन्तरिकशान्तिः- अस्मिन् व्यक्तिनाऽत्मना सह तन्मयता-सरलस्वभाव-द्वेषराहित्य-शान्तमनोवृत्ति-आध्यात्मिकचिन्तन-सकारात्मकदृष्टिकोंण-सुखानुभव-कलाप्रियेत्यादिभिः सामञ्जस्यं स्थाप्यते/अनुभूयते वा।

(ख) सामाजिकशान्ति- अस्मिन् व्यक्तिषु शान्तिभावः स्नेह-मैत्रीभाव-विचारविनिमयता-भ्रातृत्वभाव-सहनशीलता-लोकतन्त्र-मानवाधिकार-नैतिकताश्चागच्छन्ति।

(ग) प्राकृतिकशान्ति- प्राकृतिकशान्तिशिक्षायाः अन्तर्गतं प्राकृतिकवातावरण-मातृभाषयोः महत्त्वपूर्णं मन्यन्ते।

**शान्तिशिक्षायामध्यापकस्यभूमिका**- शिक्षा कस्यापि राष्ट्रस्य आत्मारूपेण तिष्ठति यं विना राष्ट्रस्य कल्पना एव न क्रियते। सा शिक्षा मानवानां भवतु अथवा पशूनां कृते। पशूनां कृते शिक्षा केवलं जीवनयापनाय भवति यां शिक्षां तस्य माता-पिता जन्मोपरान्ते ददाति। परञ्च मानवानां शिक्षा न केवलं उदरपूर्णार्थमपि च समाजे प्रतिष्ठाय, दयाभावनाय, नैतिकमूल्याय, धर्माय, कर्त्तव्याकर्त्तव्याय, परोपकाराय इत्यादिरूपेण सर्वाङ्गीणविकासाय भवति। यया विना मानवः पशोः अपि अधमं भवति। यतोहि पशवः तु मानवाः न तु सम्यक्तया उदरं पूरयति तथा च अहर्निशं परोपकारं कुर्वन्तः भवन्ति। परञ्च अशिक्षिताः मानवाः न तु सम्यक्तया उदरं पूरयति तथा च अहर्निशं समाजे विषरूपेण संस्कृतेः, प्रकृतेश्च मूलं कर्तयति। तथा संस्कृते कर्तनं भवति चेद् राष्ट्रस्य कर्तनं भवति एवं रूपेण राष्ट्रस्य विनाशः भवति। अतः यथा आत्मना विना शरीरस्य अस्तित्वं नास्ति तथैव शिक्षां विना राष्ट्रस्यास्तित्त्वं नास्ति। अतैव शिक्षैका राष्ट्रस्य तादृश्यावश्यकता विद्यते यस्योपरान्ते कस्यापि वस्तोः आवश्यकता न भवति। यथात्मा शरीरस्य सर्वावश्यकता विद्यते यस्योपरान्ते कस्यापि वस्तोः आवश्यकता न भवति। यथात्मा शरीरस्य सर्वावश्यकताः पूरयति तथैव शिक्षा सर्वासामावश्यकतानामावश्यकता पूरयति न कोऽपि सन्देहः। यतोहि मानवानां जीवने चतस्त्रः आवश्यकताः भवन्ति धर्मार्थकाममोक्षश्च। एतासामावश्यकतानां पूर्तिः केवलं मन्येऽहं शिक्षा राष्ट्रस्यात्मा यया विना राष्ट्रस्य कल्पना न क्रियते। परञ्च आत्मनुपरि परमात्मा भवति यं विना आत्मनः अपि कल्पना न सम्भवति। कोऽपि शिक्षकः कस्यापि राष्ट्रस्य राष्ट्रपितारूपेण विद्यते यः शिक्षया राष्ट्रस्य पालन-पोषणञ्च इत्यादीनां गुणाः निवसन्ति। तान् गुणानाश्रित्य स्वकीयान् शिष्यान् पाठयति। अस्माकं परम्परायां तु शिक्षकस्य स्थानं सर्वोपरि विद्यते। साम्प्रतिकः समयः अर्थप्राधान्यः वर्तते। अस्मात् कारणात् छात्राः अपि तनावग्रस्ताः सन्ति। तस्मात् कारणात् तेभ्यो शान्तिशिक्षा परमावश्यकी। अध्यापकः शान्तिशिक्षायाः स्थापनायै वर्धनायै च अधोलिखिताः प्रयासाः कर्तुं शक्यते।

1. अध्यापकः मार्गदर्शकत्वेन छात्रसम्बद्धसमस्यान् अवगत्य तेषां परिहारार्थं निर्देखशनं दातुं शक्यते। पारिवारिककलहेन उत्पन्नतनावं तत्सम्बन्धिव्यक्तिभिः सह मिलित्वा समाधातुं च शक्नोति।
2. परामर्शकत्वेनापि सः छात्रेभ्योः विविधाव्यूहैः कौशलैः च तत्समाधातुं विविधोपायान् अन्वयैतुं शक्यते।
3. समये-समये राष्ट्रियान्ताराष्ट्रियपर्वेषु यथा- अन्ताराष्ट्रियशान्तिदिवसः इत्यादि पर्वसु कार्यक्रमान् आयोज्य शान्तेः महत्त्वं प्रतिपदयितुं शक्नोति।
4. यदि केनापि सह छात्रस्य द्वेषः वा मतभेदः वर्तते तु शिक्षकः तेन सह मिलित्वा अध्यापकः समायोजनं संस्थापयितुं शक्नोति।
5. छात्रैः प्राप्तासफलताः अपि तेषु उद्वेगस्य कारणम् अतः ते आत्महत्यादि नकारात्मककार्येषु संलग्नाः भवन्ति। एतादृश्यां परिस्थितौ अध्यापकः तत्सम्बन्धि सकारात्मकपरामर्शं दत्त्वा मानसिकशान्तिस्थापना कर्तुं शक्नोति।

6. ते महानायकाः ये शान्तिसम्बद्धकार्याणि कृतवन्तः तेषां सम्बन्धे कथाश्रवणं, नाटकमंचनमादिभिः शान्तिं संस्थापयितुं शक्नोति।

**निष्कर्षः-** सम्प्रति अत्याधुनिकयुगे सर्वैरेकस्वरेण स्वीक्रियते यदौद्योगिकदृष्ट्याऽतीवविकासः सञ्जातः परञ्च विकासेन सह कुरीतयरपि समागताः। यथा- आतङ्कवादः, भ्रष्टाचारः, अविश्वासः, विविधनवीनरोगाः, निरुद्योगः, कठिनजीवनशैली, आध्यात्मिकतायाः अभावेः, चौरकर्मेत्यादयः। यदि वयं विचारः कुर्मश्चेत् एतेषां समस्यां निराकरणं नियमाधिनियमादिभिः नापितु मूल्य-शान्तिशिक्षयैव भवितुं शक्नोति। एताः समस्याः देशविशेषस्य नापितु सम्पूर्णस्य विश्वस्य। यदि वयं मूल्यप्रियशान्तिप्रियवातावरणस्य च विषये विचारयामःतर्हि मूल्यशिक्षायां शान्तिशिक्षायाञ्च एतादृश्याः स्थायिभावनायाः विकासस्य भावः निहितः वर्तते यस्मात् प्रेरितं भूत्वा व्यक्तिः, समूहः, समाजः, देशादिभिरन्यद्वाराऽनुसारिताविचारान् प्रति सहिष्णुताभातृत्वभावानां सदैव प्रवाहयति।

तत्र मूल्यशिक्षायाः शान्तिशिक्षायाञ्च पाठ्यक्रमः सम्पूर्णेऽपि विश्वे विश्वस्तरीयसंस्थया समानः रचनीयः। येन माध्यमेन अध्यापकः विश्वस्य छात्राणां, व्यक्तीनां समूहानां, देशानां, समाजादीनां वातावरणेषु, चिन्तनेषु, मानसिकविचारेषु, मूल्यशिक्षायाः उद्देश्येषु ऐक्यता भवेत्। समये-समये पाठ्यक्रमस्यनिर्धारणार्थं उद्देश्यनिर्धारणार्थञ्च विश्वस्तरीयसम्मेनलनानां कार्यशालानाञ्चयोजनं करणीयं तथा च मूल्यशिक्षायाः के-के लाभाः हानयश्च। यैः लाभाहानिभिः मानवाः उचितानुचितेषु, न्यायान्यायेषु, स्वार्थपरार्थादिषु स्वान्तःकरणेन निर्णयं क्रियेत्।

यदि विश्वस्तरीयाभिः संस्थाभिः मूल्यशिक्षायाः शान्तिशिक्षायाञ्च विषये अध्यापकः ध्यानं न दत्तञ्चेदतीव सन्निकर्षे सति, प्रति देशेषु विश्वे वाऽमूल्यमयः दुष्करश्च समयः दृक्ष्यति। अन्ततोगत्वा सर्वनाथः भविष्यतीति मे विचारः। अतः वर्तमानसन्दर्भे मूल्यशिक्षायाः शान्तिशिक्षायाञ्च महत्यावश्यकता दरीदृश्यते। येन सम्पूर्णऽपिविश्वे मूल्यमयवातावरणस्य शान्तिमयवातावरणस्य निर्माणं भवेत्।

**सन्दर्भग्रन्थाः-**


1. चौबे, सरयू प्रसाद, शिक्षा के समाज शास्त्रीय आधार (2003), विनोद पुस्तक मन्दिर, आगरा।
2. अग्रवाल, जे.सी., शिक्षा दर्शन (2010), क्षिप्रा पब्लिकेशन, दिल्ली।
3. द्विवेदी, कपिल देव, निबन्धशतकम् (2001), विश्वविद्यालय प्रकाशन, वाराणसी।
4. त्रिपाठी, डॉ. रमाशङ्कर, वैदिक साहित्य और संस्कृत (2012), चौखम्बा कृष्णदास अकादमी, वाराणसी।
5. तिवारी, अरुण कुमार, अग्नि की उड़ान (2008), प्रभात प्रकाशन, दिल्ली।
6. आचार्य, चाणक्य, चाणक्य नीति, साधना पब्लिकेशन्स, दिल्ली।
7. आचार्य, भर्तृहरि, भर्तृहरिशतक (2012), मनोज पब्लिकेशन्स, दिल्ली।
8. वेदव्यास, श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर।
9. अडिगः, पं. शंङ्करनारायण, कट्टिः, पं. रङ्नाथः, उपनिषत्भाष्यम् (2005), बेङ्लूरू।
10. पाण्डेय, प्रो. ओमप्रकाश, वैदिक शिक्षा के आदर्श एवं मूल्य (2005), महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान।
11. शर्मा, आर.एन, प्रमुख भारतीय दार्शनिक शिक्षा (2004), अटलाण्टिक पब्लिशर्स, नई दिल्ली।